# श्रीमद् भागवत रसिक कुटुंब

## श्री नृसिंहकवचस्तोत्रम्

उग्रं(वँ) वीरं(म्) महाविष्णुं(ञ्), ज्वलन्तं(म्) सर्वतोमुखम्।
नृसिंहं(म्) भीषणं(म्) भद्रं(म्), मृत्योर्मृत्युं(न्) नमाम्यहम् ॥

नृसिंहकवचम् वक्ष्ये, प्रह्लादेनोदितं पुरा ।
सर्वरक्षाकरं पुण्यं, सर्वोपद्रवनाशनम् ॥1 ॥

सर्व संपत्करं(ञ्) चैव, स्वर्गमोक्षप्रदायकम् ।
ध्यात्वा नृसिंहं(न्) देवेशं, हेमसिंहासनस्थितम् ॥2 ॥

विवृतास्यं(न्) त्रिनयनं, शरदिंदुसमप्रभम् ।
लक्ष्म्यालिंगितवामांगं(वँ), विभूतिभिरुपाश्रितम् ॥3 ॥

चतुर्भुजं(ङ्) कोमलांगम्, स्वर्णकुण्डलशोभितम् ।
सरोजशोभितोरस्कं, रत्नकेयूरमुद्रितम् ॥4 ॥

तप्तकां(ञ्)चनसं(ङ्)काशं, पीतनिर्मलवाससम् ।

इंद्रादिसुरमौलिस्थस् - फुरन्माणिक्यदीप्तिभिः ॥5 ॥

विराजितपदद्वंद्वं, शंखचक्रादि हेतिभिः।
गरुत्मता च विनयात्, स्तूयमानं मुदान्वितम् ॥6 ॥

स्वहृतकमलसंवासं(ङ्), कृत्वा तु कवचम् पठेत्।
नृसिंहो मे शिरः(फ्) पातु, लोकरक्षार्थसंभवः ॥ 7 ॥

सर्वगोऽपि स्तंभवासः(फ्), फालं मे रक्षतु ध्वनिम् ।
नृसिंहो मे दृशौ पातु, सोमसूर्याग्निलोचनः ॥8 ॥

स्मृतिं मे पातु नृहरिर्- मुनिवर्यस्तुतिप्रियः ।
नासं मे सिंहनासास्तु, मुखं(लॅं) लक्ष्मीमुखप्रियः ॥9 ॥

सर्वविद्याधिपः(फ्) पातु, नृसिंहो रसनां मम ।
वक्त्रं पात्विन्दुवदनं, सदा प्रह्लादवंदितः॥10 ॥

नृसिंहः(फ्) पातु मे कण्ठं, स्कंधौ भूभरणांतकृत् ।
दिव्यास्त्रशोभितभुजो, नृसिंहः(फ्) पातु मे भुजौ ॥11 ॥

करौ मे देववरदो, नृसिंहः(फ्) पातु सर्वतः ।
हृदयं(यँ) योगिसाध्यश्च, निवासं पातु मे हरिः ॥12 ॥

मध्यं पातु हिरण्याक्ष- वक्षः(ख्) कुक्षिविदारणः ।
नाभिं मे पातु नृहरिः(स्), स्वनाभि ब्रह्मसंस्तुतः ॥13 ॥

ब्रह्माण्डकोटयः(ख्) कट्यां(यँ), यस्यासौ पातु मे कटिम् ।
गुह्यं मे पातु गुह्यानां, मंत्राणां(ङ्) गुह्यरूपदृक॥14 ॥

ऊरू मनोभवः(फ्) पातु, जानुनी नररूपधृक् ।
जंघे पातु धराभार- हर्ता योऽसौ नृकेसरी ॥15 ॥

सुरराज्यप्रदः(फ्) पातु, पादौ मे नृहरीश्वरः ।
सहस्रशीर्षा पुरुषः(फ्), पातु मे सर्वशस्तनुम् ॥16 ॥

महोग्रः(फ्) पूर्वतः(फ्) पातु, महावीराग्रजोऽग्नितः।
महाविष्णुर्दक्षिणे तु, महाज्वालस्तु नैर्ऋतौ ॥17 ॥

पश्चिमे पातु सर्वेशो, दिशि मे सर्वतोमुखः ।
नृसिंहः(फ्) पातु वायव्यां, सौम्यां भूषणविग्रहः ॥18 ॥

ईशान्यां पातु भद्रो मे, सर्वमंगलदायकः ।
संसारभयतः(फ्) पातु, मृत्योर्मृत्युर्नृकेसरी ॥19 ॥

इदं(न्) नृसिंहकवचं, प्रह्लादमुखमण्डितम् ।
भक्तिमान् यः(फ्) पठेन्नित्यं, सर्वपापैः(फ्) प्रमुच्यते ॥20 ॥

पुत्रवान् धनवान् लोके, दीर्घायुरुपजायते ।
यं(यँ) यं(ङ्) कामयते कामं(न्), तं(न्) तं प्रप्नोत्यसंशयम् ॥21 ॥

सर्वत्र जयमाप्नोति, सर्वत्र विजयी भवेत् ।
भूम्यन्तरीक्षदिव्यानां(ङ्), ग्रहाणां(वँ) विनिवारणम् ॥22 ॥

वृश्चिकोरगसंभूत विषापहरणं परम् ।
ब्रह्मराक्षसयक्षाणां(न्), दूरोत्सारणकारणम् ॥23 ॥

भूर्जे वा तालपत्रे वा, कवचं(लँ) लिखितं शुभम् ।
करमूले धृतं(यँ) येन, सिध्येयुः(ख्) कर्मसिद्धयः ॥24 ॥

देवासुरमनुष्येषु, स्वं स्वमेव जयं(लँ) लभेत् ।
एकसंध्यं(न्) त्रिसंध्यं(वँ) वा, यः(फ्) पठेन्नियतो नरः ॥25 ॥

सर्वमंगलमांगल्यं, भुक्तिं मुक्तिं(ञ्) च विंदति ।
द्वात्रिंशतिसहस्राणि, पठेत् शुद्धात्मनां(न्) नृणाम् ॥ 26 ॥

कवचस्यास्य मंत्रस्य, मंत्रसिद्धिः(फ्) प्रजायते।
अनेन मंत्रराजेन, कृत्वा भस्माभिमंत्रणम् ॥27 ॥

तिलकं(वँ) विन्यसेद्यस्तु, तस्य ग्रहभयं हरेत्।
त्रिवारं(ञ्) जपमानस्तु, दत्तं(वँ) वार्यभिमंत्र्य च ॥28 ॥

प्राशयेद्यो नरो मंत्रं(न्), नृसिंहध्यानमाचरेत् ।
तस्य रोगा:(फ्) प्रणश्यंति, ये च स्यु:(ख्) कुक्षिसंभवा: ॥29 ॥

किमत्र बहुनोक्तेन, नृसिंहसदृशो भवेत् ।
मनसा चिंतितं(यँ) यत्तु, स तच्चाऽप्नोत्यसंशयम् ॥30 ॥

गर्जंतं(ङ्) गर्जयंतं(न्) निजभुजपटलं स्फोटयंतं हठंतं,
रूप्यंतं(न्) तापयंतं(न्) दिवि भुवि दितिजं(ङ्) क्षेपयंतं रसंतं ।
गर्जन्तं(ङ्) गर्जयन्तं(न्) निजभुजपटलं स्फोटयन्तं हठन्तं ,
रूप्यन्तं(न्) तापयन्तं(न्) ,
दिवि भुवि दितिजं(ङ्) क्षेपयन्तं(ङ्) क्षिपन्तम् ॥
क्रन्दन्तं रोषयन्तं(न्) दिशि दिशि सततं संहरन्तं भरन्तं ,
वीक्षन्तं(ङ्) घूर्णयन्तं शरनिकरशतैर्दिव्यसिंहं(न्) नमामि ॥ 31॥

॥ इति श्रीब्रह्माण्डपुराणे प्रह्लादोक्तं श्रीनृसिंहकवचं सम्पूर्णम् ॥